Ex/Sans/UG/3.3/26/2017

# BACHELOR OF ARTS EXAMINATION, 2017

(2nd Year, 3rd Semester)

**SANSKRIT (Honours)**

**Course : VIII**

**[Vedic Grammar and Outline of History of Vedic Literature]**

Time : Two Hours Full Marks : 30

*The figures in the margin indicate full marks.*

१। अधोलिखितेषु सूत्र**द्वयं** सोदाहरणं सुरगिरा व्याख्यायताम्। 3×2=6

(क) विशाखयोश्च।

(ख) चतुर्थ्यर्थे बहुलं छन्दसि।

(ग) सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः।

(घ) आज्जसेरसुक्।

२। अधोलिखितेषु **द्वयोः** सप्रसङ्गं सुरगिरा नागरीलिप्या च व्याख्या कार्या— 3×2=6

(क) इहान्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वे सति नलोपः प्राप्तो भत्वाद् वार्यते।

(ख) अत्र पदत्वाद् जश्त्वम्। भत्वात् कुत्वाभावः।

(ग) बहुलं छन्दसीत्यादिरस्यैव प्रपञ्चः।

(घ) अक्षरसमूहे छन्दस उपसंख्यानम्।

[*Turn over*]

३। अधोलिखितेषु **एकस्य** ससूत्रं सुरगिरा सिद्धिर्विधेया — 3

प्रणङ्, रमयामकः, मादयैते।

४। अधोलिखितेषु **द्वयोरु**त्तरं देयम् — 5×2=10

(क) को नाम संवादः? ऋग्वेदीयसंवादसूक्तमधिकृत्य समासत आलोच्यताम्।

(ख) ऋग्वेदस्य कालविषये भारतीयपण्डितानां मतमुल्लिख्यताम्।

(ग) ऋग्वेदीयसृष्टितत्त्वमूलकं सूक्तत्रयमवलम्ब्य तेषां दार्शनिकत्वं विचार्यताम्।

५। अधोलिखितेषु **पञ्च** प्रश्नाः सुरगिरा देवनागरीलिप्या च समाधेयाः — 1×5=5

(क) ऋग्वेदस्य शाखाद्वयस्योल्लेखः कार्यः।

(ख) निरुक्तानुसारं देवताया निर्वचनं देयम्।

(ग) ऋग्वेदस्य अष्टममण्डलस्य नामान्तरं किम्? किमर्थमेतन्नामकरणम्?

(घ) सामवेदस्य उपनिषदां नामानि लेख्यानि।

(ङ) अथर्ववेदस्य पुरोहितस्य नाम किम्? अस्य वेदस्य ब्राह्मणस्य नाम किम्?

(च) रुद्रदेवतायाः स्तुतिः प्राधान्येन कस्मिन् वेदे उपलभ्यते? वेदोत्तरकाले तस्या देवतायाः किमस्ति नामान्तरम्?

[*Turn over*]